अरत्वं । अङ्मात्रं । अज्मात्रं । ककुम्मंडलं । ककुप्मंडलं । वाङ् मधुरं । वाग्मधुरं । षण्नगाः । षड्नगाः । [illegible] । तद्नयनं ॥ वाक् मयं । मधुलिट् मानं । इति स्थिते--

५४ । त्ये[1] । ५ । ४ । यरः पदांते वर्तमानस्य ङो भवति ङसंज्ञादौ त्ये परतः । पुनर्वचनं नित्यार्थं । वाङ्मयं । मधुलिण्मानं ॥ अज् हलौ । अप्‌टुप् हुतं । वाक् हरति । षट् हलानि । तत् हितं । इति द्विः स्थिते यय्यं परस्वमित्यधिकृत्य- "स्थास्थंभोः पूर्वस्योदः" इति च प्रस्तुत्य--

५५ । झयो हः । ५ । ४ । अतीतसूत्रं चतुष्टयविधानं समंतभद्रस्याचार्यस्य मतेन विकल्पो भवति नान्येषां । स्वाश्रम इति महाभाषास्योष्मणो हकारस्य स्थाने तादृश एव तद्गुणवर्ग-चतुर्थो भवति । अज्झलौ । अज्हलौ । अप्टुब्भुतं । अप्टुब् हुतं । वाग्घरति । वाग्हरति । षड्ढलानि । षड्हलानि । तद्धितं । तद्हितं ॥ सुवाक् शोभते । ककुप् श्रूयते । मधुलिट् श्यामः । तत् श्वेतं । तत् श्लोकः । तत् श्मशानं । इति द्विः स्थिते-झयः पदांतादित्यधिकृत्य -

५६ । शश्छोऽमि । ५ । ४ । झयः पदांतादुत्तरस्य शकारस्य छकारो भवति अमि परतः । चतुष्टयं समन्तभद्रस्य-

---

१ । यस्य स्थाने नास्ति किमपि सूत्रं परं 'यरो ङो विभाषा ङे । ५ । ४ । १२५ ।" इति सूत्रे विभाषापदग्रहणसामर्थ्यात् कार्यमस्य कृतं ।

## अथ नामनिर्णयमनुवर्णयिष्यामः ।

### तत्र अजंताः पुंलिंगाः ।

तद्यथा—संव्यवहारप्रसिद्ध्यर्थं पुरुषैः संकेतितः शब्दो नाम । तत् द्विविधं । अजंतं हलंतं चेति । तदष्टविधमपि संभवति । पुंलिंगं स्त्रीलिंगं नपुंसकलिंगं स्त्रीपुंसकलिंगं पुन्नपुंसकलिंगं स्त्रीनपुंसकलिंगं स्त्रीपुंनपुंसकलिंगं अलिंगं चेति । तत्र अजंतेषु पुंलिंगेषु प्रथममकारांतः पुंलिंगो धर्म इत्येष शब्दः स्वभावादेवैकत्वादिवृत्तिमान् । अव्युत्पत्तिपक्षे—

८८ । **अधु मृत्** । १ । १ । धुवर्जितमर्थवच्छब्दरूपं मृत् संज्ञं भवति । इति मृत्संज्ञां लभते । व्युत्पत्तिपक्षे पुनः—

८९ । **कृद्वृत्साः** । १ । १ । कृदंतं त्वदंतं ससंज्ञकं च मृत्संज्ञं भवति । इति लब्धमृत्संज्ञकादतः त्यः पर इत्यधिकृत्य-ङ्याम्मृद इति च प्रस्तुत्य—

९० । **स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप्** । ३ । १ । ङ्यंतादाबंतान्मृद्रूपाच्च परास्त्यसंज्ञामूला स्वादयो भवंति । इति विधानादविशेषेण सर्वस्वादिप्रसंगे प्राप्ते 'भिङैकार्थे वा:' इत्येवमादिना लक्षणेन स्वादीनां नियमः क्रियते । कथं--मिङसिशौऽसद्युष्मदन्या, इति सुपश्चेति चानुवर्तमाने—

९१ । [1]**आप्परा विभक्तीहलच्चः** । १ । २ । अर्थ-

---

१ । अस्य स्थाने तासामाप्परास्सद्धलचः । १ । २ । १५७ इति

कृत्संज्ञस्य: कर्तरि भवति । क्विप् पुनः कृत् ।

१६१ । **कृदमिङ्** । २ । १ । ६६ । मिङ्वर्जितो घोर्विहितस्यः कृत्संज्ञो भवति । इति कर्तरि भवति । स सर्वोऽप्रयोगीत् । ककारः क्विङतीति विशेषणार्थः । वकारः प्राक्केर्वोऽसम इति सति साम्ये बाधनार्थः । इकारः उच्चारणार्थः । पकारः पिति कृति तुगिति विशेषणार्थः । ततः कृदंतस्य मृत्संज्ञायां स्वादिविधिः प्राप्तः । क्षीर अम् पा इति स्थिते सुप् सुपेत्यधिकृत्य -

१६२ । **वागमिङ्** । १ । ३ । ८५ । मिङ्वर्जितं वाक्संज्ञं कृदंतेनोत्तरपदेन सह नित्यं षसो भवति । अमिङिति प्रतिषेधवचनं ज्ञापकं तिवाक्कारकाणां कृद्भिः सह सुबुत्पत्तेः प्राक् एव सो भवतीति । किं वाग्संज्ञं ।

१६३ । **ईपा वाक्**[1] । २ । १ । ६७ । तत्र घोरभिकारे ईपा निर्दिष्टस्य वाक् संज्ञा भवति । इति वाक् संज्ञा ।

१६४ । **सुपो धुमृदोः** । १ । ४ । १६७ । धुमृदोरवयवभूतस्य सुप उप् भवति । इति सुप उप् ।

१६५ । [2]**वोक्तं पूर्वं** । १ । ३ । १०६ । साधिकारे यया विभक्त्योक्तं पूर्वं प्रयोक्तव्यं । इति क्षीरशब्दस्य पूर्वनिपातः । क्षीरपा इत्येतस्मात् स्वादिविधिः सुटि नास्ति विशेषः । क्षीरपाः, क्षीरपौ, क्षीरपाः । संबोधनेप्येवं । क्षीरपां, क्षीरपौ । शसादा-

---

१ । अस्य स्थाने-ईपात्र वाक् । २ । १ । ७९ इति सूत्रं ।

२ । अस्य स्थाने-वोक्तं न्यक् । १ । ३ । ९३ । इति सूत्रं ।

भ्यः। ग्रामण्यः। ग्रामणीभ्यां। ग्रामणीभ्यः। ग्रामण्यः। ग्रामण्योः। ग्रामण्यां। कौ —

१९३। **न्याम्मोर्कैराम्**[१]।५।२।११९। नीइत्येतस्मात् आवंतात् मुसंज्ञकाच्च परस्य केः आमित्ययमादेशो भवति। ग्रामण्यां। ग्रामण्योः। ग्रामणीषु। एवं अग्रणी प्रभृतयोऽपि योज्याः। स्त्रीलिंगेप्येवमेव। उन्नीशब्दस्य भेदः। णीञ् इति स्थिते नत्वं तस्य गिना योगः। को गिः। प्रादिरिति वर्तमाने—

१९४। **क्रियायोगे गिः**। १। २। १५७। क्रियायां धवर्थेन योगे संबंधे सति प्रादयो गिसंज्ञा भवंति। के पुनः प्रादयः। प्रपराऽपसमन्ववनिर्दुरव्याङ् न्यधयोऽप्यतिसूदभयश्च। प्रतिना सह लक्षयितव्याः पर्युपयोरपि लक्षणमत्र॥१॥ इति विंशति प्रादयः।

१९५। **तिः**। १। २। १५८ प्रादयः तिसंज्ञाश्च भवंति।

१९६। **प्राग् धोस्ते**। १। २। १७५। ते गितिसंज्ञाः शब्दाः धोः प्राग् प्रयुज्यंते। इति पूर्वप्रयोगनियमः। ततस्मात्प्राशःकृत्वसुसुपृवद्धाभ्रस्कांतुमसुभिमज्ञाभवित्यन्यकस्वरादयो झिरित्युच्चशब्दस्य झिसंज्ञायां सत्यां सुपो झिरित्युप्वचनसामर्थ्यात् सुः तत उप्। नयतीति विगृह्य-पूर्ववद् क्विबादिः। उत् स् नी इति स्थिते—

१९७। **तिक्वाङ्कुः**[२]। १। ३। ८२। तिसंज्ञाः कुः प्राङ् दुस् इत्येते च शब्दाः समस्यंते नित्यं षसो भवति। पूर्ववद्

१। अस्य स्थाने "ङेराम् न्याम्नीभ्यः। ५। २। ११०" इति सूत्रं। २। अस्य स्थाने "तिकुप्रादयः। १। ३। ८१" इति महावृत्तौ

२३०।य्वौ स्त्र्याख्यौ नुः । १ । २ । १०४ । यौ ईकारोकारौ स्त्रियमाचक्षाणौ तौ नुसंज्ञौ भवतः । इति नुसंज्ञायां—"कौ" प्रोऽम्बार्थनद्याः इति प्रस्तुत्य—

२३१ । [1]मोः । ५ । २ । ११० । म्वंतस्य प्रादेशो भवति कौ परतः । प्रादिति केः खम् । हे लक्ष्मि । हे लक्ष्म्यौ । हे लक्ष्म्यः । लक्ष्मीं । लक्ष्म्यौ । लक्ष्मीः । लक्ष्म्या । लक्ष्मीभ्यां । लक्ष्मीभिः । किन्तु नुसंज्ञायां-लक्ष्म्यै । लक्ष्मीभ्यां । लक्ष्मीभ्यः । लक्ष्म्याः । लक्ष्मीभ्यां । लक्ष्मीभ्यः । लक्ष्म्याः । लक्ष्म्योः । प्रेण्म्वादिना नुट् । लक्ष्मीणां । लक्ष्म्यां । लक्ष्म्योः । लक्ष्मीषु । एवं तंत्रीप्रभृतयः । उभयट् टकारः स्त्रियां ङ्यर्थः । उभय इति स्थिते-इञ्जूटिड्ढाणञठण्ठ इति टित्वादतो ङीः । ङकारो हल्ङ्याब्भ्यः इति विशेषणार्थः । टिखं । ऐरिति चानुवर्तमाने-

२३२।[2]ङ्याम् । ४ । ४ । १५१। मोरवर्णान्तस्य इवर्णान्तस्य भस्य खं भवति ङीस्थे परतः । ततः स्वादयः । उभयी । उभय्यौ । उभय्यः । हे उभयि । हे उभय्यौ । हे उभय्यः । उभयीं । उभय्यौ । उभयीः । उभय्या । उभयीभ्यां । उभयीभिः । उभय्यै । उभयीभ्यां । उभयीभ्यः । उभय्याः । उभयीभ्यां । उभयीभ्यः । उभय्याः । उभय्योः । उभयीनां । उभय्यां । उभय्योः । उभयीषु । कर्तृशब्दस्य भेदः । "ङ्याम्भृदः" स्त्रियामिति चाधिकृत्य—

---

१ । अस्य स्थाने-"प्रोम्बार्थम्वोः । ५ । २ । १०२ । इति ।

२ । अस्य स्थाने-यस्य ङ्यां च । ४ । ४ । १३४ । इति ।

अनडुह् इति गौरादिषु उभयथा पाठात् ङीत्यः । ततः स्वाद्यः । अनड्वाही । अनड्वाह्यौ । अनड्वाह्यः । हे अनड्वाहि । इत्यादि। तथा-अनडुही । अनडुह्यौ । अनडुह्यः । हे अनडुहि । इत्यादि ज्ञेयं । श्रीशब्दस्य भेदः । श्रिञ् सेवायां । श्रिञ् ञकारो दविध्यर्थः। धुसंज्ञायां-क्वचिदिति वर्तमाने—

२४४ । क्विप् । २ । २ । ७२ । क्विप् च क्वचिद् दृश्यते । स च अप्रयोगी प्रतीयते । क्वचिदित्येतस्य बहुलार्थत्वात् क्वचिदन्यथैवेति वचनात् दीत्वम् । श्री इत्यतः स्वादयः । श्रीः । भूतपूर्वगत्या क्व्यंतो धुत्वं न जहाति इति वा धुत्वात् हल्स्नुधुभ्रुवोऽचीधुब्योरिति अजादौ इयादेशः । श्रियौ । श्रियः । किंसंबोधने आमि युवोरिति नियमात् अमुसंज्ञायां-हे श्रीः । हे श्रियौ । हे श्रियः । श्रियं । श्रियौ । श्रियः । श्रिया । श्रीभ्यां । श्रीभिः । ङिद्वचनेषु — आमि युवोः, वेति च प्रस्तुत्य—

२४५ । ङिति प्रश्च । १ । २ । १०८ । य्वोर्यः प्रः ङ्याख्यो यौ च स्वावियुवोः स्थानिनौ स्थ्याख्यौ तेषां तत्संबंधिनि अन्यसंबंधिनि वा ङिति वा मुसंज्ञा भवति । इति मुसंज्ञायां अडागमोऽन्यत्र इयादेशः । श्रियै । श्रिये । श्रीभ्यां । श्रीभ्यः । श्रियाः । श्रियः । श्रीभ्यां । श्रीभ्यः । श्रियाः । श्रियः । श्रियोः । "आमि युवोरिति" वर्तमाने—

२४६ । वा । १ । २ । १०७ । यावियुवोः स्थानिनौ य्वौ स्थ्याख्यौ तौ आमि वा मुसंज्ञौ भवतः । श्रीणां । श्रियाम् । श्रियि ।

वारिभ्यां । वारिभ्य: । वारिण: । वारिणो: । आमि–ह्रस्वनद्यापो नुडिति नुट् । नामि–सुप्तिङन्तं पदमित्यधिकृत्य–

२६२ । स्वादिष्वसर्वनामस्थाने । १ । ४ । १७ । कप्प्रत्ययावधिषु स्वादिषु असर्वनामस्थानेषु परत: पूर्वं पदसंज्ञं भवति । पदस्येत्यधिकृत्य नो मृदन्ते नलोप इति नखं । ततो नाम्यतिसृचतसृ इति दीर्घत्वेन नस्यासिद्धत्वात् –

२६३ । नोपधाया: । ६ । ४ । ७ । नकारांतस्य उपधाया दीर्घो भवति नामि परत: । इत्युक्ते दीर्घत्वं । वारीणां । वारिणि । वारिणो: । वारिषु । एवं सक्थिअस्थिदध्यक्षिशब्दानां रूपसिद्धि: । टादावजादौ तु विशेष: । भादावीति वर्तमाने—

२६४ । [1]अस्थिदधिसक्थ्यक्ष्णामनङुदात्त: । ७ । १ । ७५ । सक्थि अस्थि दधि अक्षि इत्येतेषामिगंतानां नपुंसकलिंगानां अनङा-देशो भवति भादावजादौ परत: । ङकारोंत्यादेशार्थ: । नकारेऽकार उच्चारणार्थ: । भस्येत्यधिकृत्य—

२६५ । अल्लोपोऽन: । ६ । ४ । १३४ । भसंज्ञकावयवस्य अनित्येतस्याकारस्य खं भवति न चेत् सोऽन्शब्दो मकारवकारांतात् संयोगात् परो भवति । सक्थ्ना । सक्थिभ्यां । सक्थिभि: । सक्थ्ने । सक्थिभ्यां । सक्थिभ्य: । सक्थ्न: । सक्थि-भ्यां । सक्थिभ्य: । सक्थ्न: । सक्थ्नो: । सक्थ्नाम् । भस्य अनोखमन्वस्फादित्यधिकृत्य—

२६६ । विभाषा ङिश्यो: । ६ । ४ । १३६ । भसंज्ञावयवस्यानि-

[1] । अस्य स्थाने अस्थिदधिसक्थ्यक्ष्णामनङ् । ५ । १ । ५४ । इति ।

याम् । "ऊकार अविद्धमः" इति विशेषणार्थः । मित्रशब्दात्रम् । मित्रं द्रुह्यतीति विगृह्य क्विप् प्रत्ययः । सुप् स्वादयः ।

२७१ । वा द्रुहमुहष्णुहष्णिहां । ५ । ३ । ६६ । द्रुह् मुह् ष्णुह् ष्णिह् इत्येषां हकारस्य घकारादेशो वा भवति झलि पदान्ते च । पदे ढत्वं । एकाचो बाशीत्यादिना भष्भावः । मित्रध्रुक् । मित्रध्रुक् । मित्रध्रुग् । मित्रध्रुड् । मित्रध्रुट् । मित्रध्रुड् । मित्रध्रुड् । एवं झलि पदान्ते च रूपद्वयं । अजादौ तु संहितैव । एवं मुह्ष्णिह्ष्णुह् इत्येते शब्दाः । अनडुह्शब्दस्य भेदः । ततः स्वादयः । "एधे" इत्यधिकृत्य—

२७२ । चतुरनडुहोर्वा: ।.५ । १ । ७९ । चतुरनडुहोस्तदन्तस्य च गोरुकारस्य वा इत्ययमादेशो भवति घे परतः ।

२७३ । सावनडुहः । ५ । १ । ६४ । अनडुहो नुमागमो भवति सौ परतः । सोः खं । हकारस्य स्फान्तस्य खं । घेऽका-विति दीर्घं । अनड्वान् । अनड्वाहौ । अनड्वाहः । संबोधने—

२७४ । चः कौ । ५ । १ । ८० । चतुरनडुहोस्तदन्तस्य च गोरुकारस्य च इत्ययमादेशो भवति कौ परतः । हे अनड्वन् । हे अनड्वाहौ । हे अनड्वाहः । अनड्वाहम् । अनड्वाहौ अनडुहः । अनडुहा । हलादौ—

२७५ । वसुस्रंसुध्वंस्वनडुहां दः । ५।३ । १०७ वसु स्रंसु ध्वंसु अनडुह् इत्येतेषां सकारस्य हकारस्य च पदान्तस्य

नेयं । एवं मातिदीवन्शब्दः । पूषन्शब्दस्य तु भेदः । ततः स्वादयः ।

२८१ । **इन्हन्पूषार्यम्णां शौ**[1] । ४ । ४ । ९ । इन् हन् पूषन् अर्यमन् इत्येतेषामुङः शावेव दीर्घो भवति । नान्यत्र । इति नियमादप्रासे पुनः—

२८२ । **सौ** । ४ । ४ । १० । किवर्जिते सौ एव इन् हन् पूषन् अर्यमन् एतेषामुङो दीर्घो भवति । पूषा । पूषणौ । पूषणः । हे पूषण् । हे पूषणौ । हे पूषणः । पूषणम् । पूषणौ । शसादौ राजन्वज्ज्ञेयः । पूष्णः । पूष्णा । पूषभ्यामित्यादि । एवं अर्यमन्शब्दः । ब्रह्महन्शब्दस्य भेदः । हनो गतिहिंसनयोः । औकारोऽनिर्दिष्टार्थः । ब्रह्माणं हतवान् इति विग्रह-मूले "कर्मणि हनः" इत्यधिकृत्य—

२८३ । **ब्रह्मभ्रूणवृत्रे**[2] **क्विप् घ्नः** । २ । २ । ९८ । ब्रह्म भ्रूण वृत्रेषु कर्मसु वाक्षु भूते काले हन्तेर्धोः क्विप् त्यो भवति । स चाप्रयोगी । ह्रस्य अल्व्यञ्चोरिति दीर्घत्वं प्राप्तं । इन्हन्निति नियमान्न भवति । वाक्सः । सुविति मृत्वं च स्वादयः । सावेिति दीर्घत्वं च । ब्रह्महा । षूः णो नः । प्राक्पदस्थादिति च प्रस्तुत्य—

२८४ । **एकाच्च्यौ णः** । ५ । ४ । ११४ । षकाररेफात् प्राक्पदस्थात् परस्य एकाच्च्यौ मृदन्तनुम्सुब्नकारस्य नित्यं णत्वं

---

१ । अत्र "शौ । ४ । ४ । १० इति भिन्नं सूत्रं । २ । अत्र बहुवचनं महासूत्रौ ।

भवति । ब्रह्महणौ । ब्रह्महण: । हे ब्रह्महन् । हे ब्रह्महणौ । हे ब्रह्महण: । ब्रह्महणम् । ब्रह्महणौ । शसादावजादावनोऽखे कृते "चजोः कुघिण्ये तेऽनिटः" इत्याधिकृत्य—

२८५ । हो घ्नो[1] ञ्णिञ्ञि । ५ । २ । ६७ । हन्तेर्हकारस्य ञिति णिति त्ये नकारेण च योगे सति कुत्वं भवति ।

२८६ । धि घ्नः[2] । ५ । ४ । १३५ । निमित्तनैमित्तकयोर्मध्ये मकारादेशे सति हन्तेर्नकारस्य णत्वं न भवति । ब्रह्मघ्नः । ब्रह्मघ्ना । ब्रह्मह्भ्यामित्यत्र—

२८७ । नखं सुब्विधिकृत्तुकि । ५ । ३ । ३६ । सुपः स्थाने सुपि च विधौ कृदाश्रये तुकि कर्तव्ये न खं असिद्धं भवति । इति क्विबाश्रयस्तुक् न भवति तदा ब्रह्महाभिरित्यादि । एवं भ्रूणहन् आदयः । सुधन्वन्सुपर्वन्शब्दयोर्म्वस्फादिति प्रतिषेधात् अनो खं न भवति । शसादावाचे पूर्ववदन्यत् । सुधर्मणः । सुपर्वणः । इत्यादि नेयं । एवं सुचर्मन्यज्वन् प्रभृतयः । श्वन्शब्दस्य मुटयविशेषः । श्वा । श्वानौ । श्वानः । हे श्वन् । हे श्वानौ । हे श्वानः । श्वानम् । श्वानौ । शसादावचि-वसोर्वस्योशिति प्रस्तुत्य—

२८८ । श्वयुवन्मघोनोऽह्नीति । ४ । ४ । १३३ । श्वन् युवन् मघवन्नित्येषां भसंज्ञकानां अवयवस्य वकारस्य उशादेशो भवति अहृति गुनिमित्ते त्ये परतः । शकारः सर्वादेशार्थः ।

---

१ । अत्र "हन्तेः" इति पाठो महावृत्तौ । २ । अस्य स्थाने "हतेर्घः । ५ । ४ । १०६ । इति सूत्रं ।

२९४ । ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च। ३ । २ । ५९ । ऋत्विग् दधृग् स्रग् दिग् उष्णिक् इत्येते शब्दाः क्व्यंता निपात्यंते । अंचु युजि क्रुंचि इत्येषां क्विन्श्चेति क्विन्भवति । स चाप्रयोगी । ततः स्वादयः ।

२९५ । युजेरसमासे । ७ । १ । ७१ । युजिरित्येतस्य नुम्भवत्यसमासे सर्वनामस्थाने परतः । सुखं । स्फान्तत्वं ।

२९६ । क्विन्प्रत्ययस्य कुः । ८ । २ । ६२ । क्विन्प्रत्ययो यस्य तस्य धोः कुत्वं भवति झलि च पदान्ते च । इति नकारस्य ङकारः । युङ् । नश्चापदांते झलीत्यनुस्वारः । ययि परसवर्णीति ञकारः । युञ्जौ । युञ्जः । हे युङ् । हे युञ्जौ । हे युञ्जः । युञ्जं । युञ्जौ । युजः । युजा । युग्भ्याम् । युग्भिः । इत्यादि । भ्रस्जोन् पाके । अकारोका-रावितौ । धाना भृज्जतीति विगृह्य क्विप् । लिटीग्यणः सा-चोर्ग्राऽऽज्यं" इत्यधिकृत्य—

२९७ व[1] श्चिव्यधिव्यचिज्याग्रहिवश्चिप्रच्छिभ्रस्जां-क्ङिति । ४ । ३ । २५ । वश्यादीनां धूनां किति ङिति च ल्ये परतः साचोऽर्थपरस्य यणः इगादेशो भवति । पश्चात् वाक्सः । सकारस्योपदेशसामर्थ्यात् खं । जश्त्वं चुत्वं च न भवति । ततः स्वादयः ।

२९८ । स्फादेः स्कोंते च । ५ । ३ । ५८ । झलि च पदान्ते च यः पदावयवः स्फांतः तस्यादेः सकारस्य ककारस्य च खं भवति ।

---

१ । अस्य स्थाने—ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च । ६ । १ । १६ । इति सूत्रं मुद्रिते सूत्रपाठे ।

प्राक्न्यूशब्दस्य भेदः । अंचु गतिपूजयोः । उकारो वेदर्थः । प्रांचतीति विगृह्य-क्विः—

३०७ । हलुङः क्ङित्यनिदितः । ४ । ४ । २२ । हलन्तस्य गोरुङो नकारस्य खं भवति ङिति परतः इदितं वर्जयित्वा । ततः स्यादयः ।

३०८ । उगिदचां घेऽभ्वादेः । ५ । १ । ५१ । भूवादिवर्जितानां उगितां घूनामंचतेश्च नष्टनकारस्य नुम् भवति घे परतः । पूर्ववदितो निवृत्तिः । सुखस्कान्तखकुत्वानि । प्राङ् । प्रांचौ । प्रांचः । सम्बोधनेप्येवम् । प्रांचम् । प्रांचौ । शसादावाचि । प्र अच् अस् इति स्थिते । भस्येत्यत्वमिति च प्रस्तुत्य–

३०९ । अचः । ४ । ४ । १३७ । अञ्चतेर्नष्टनकारस्य भसंज्ञकस्य गोरकारस्य खं भवति । दीरित्याधिकृत्य–

३१० । चौ । ४ । ३ । २९९ । अंचतौ नष्टनकाराकारे चौ पूर्वस्य दीर्भवति । प्राचः । प्राचा । हलादौ जस्त्वकुत्वे । प्राग्भ्याम् । प्राग्भिः । प्राचे । प्राग्भ्याम् । प्राग्भ्यः । प्राचः । प्राग्भ्याम् । प्राग्भ्यः । प्राचः । प्राचोः । प्राचाम् । प्राचि । प्राचोः । प्राक्षु । प्रतिपूर्वत्वे-प्रत्यङ् । प्रत्यंचौ । प्रत्यंचः । सम्बोधनेप्येवं । प्रत्यंचम् । प्रत्यंचौ । प्रतीचः । प्रतीचा । प्रत्यग्भ्याम् । प्रत्यग्भिः । इत्यादि । उत्पूर्वत्वे-उदङ् । उदंचौ । उदंचः । सम्बोधनेप्येवं । उदंचम् । उदंचौ । शसादावचि-"अचः इति अखे प्राप्ते—

३११ । ईदुमः । ४ । ४ । १३८ ॥ उद उत्तरस्य नष्ट-

समुंज्झि । इत्यादि । भकारान्तः गर्दभ्शब्दः । गर्दप् । गर्दब् । गर्दभी । गर्दम्भि । इत्यादि । घकारान्तः साधुघक् । साधुघग् । साधुगघी । साधुगंघि । इत्यादि । ढकारान्तः मूढ इवाचरतीति मूढति । पुनः क्विप् । मूड् । मूट् । मूढी । मूंढि । इत्यादि । धकारांतस्तत्त्वभुत् । तत्त्वभुद् । तत्त्वबुधी । तत्त्वबुंधि । इत्यादि । जकारांतो धानाभृस्ज्शब्दः । ततः स्वादयः । स्फादेः स्कोंतेति सकारस्य खं । व्रश्चभ्रस्जेत्यादिना षत्वं । जश्त्व चर्त्वे । धानाभृड् । धानाभृट् । धानाभृज्जी । जश्शसोरंतरंगत्वात् सकारस्य जश्त्वचर्त्वयोः कृतयोः शौ नुमि विशेषः । धानाभृज्जि । इत्यादि । बगडंता असिद्धाः । दकारांतो द्विपाद्शब्दः । ततः स्वादयः । द्विपात् । द्विपाद् । श्यां परभूतायां पादः पदिति पद्भावः । द्विपदी । द्विपांदि । इत्यादि । एवं त्रिपादादयः । खकरांतः-सुदुक् सुदुग् । सुदुःखी । सुदुंःखि । इत्यादि । फकारांतः-निर्गुप । निर्गुब् । निर्गुफी । निर्गुंफि । इत्यादि । छकारांतः-प्रमोछत इति क्विप् । प्रमोड् । प्रमोच् । प्रमोच्छी । प्रमोञ्छि । इत्यादि । ठकारान्तः सुपठ् । सुपड् । सुपठी । सुपण्ठी । इत्यादि । थकारांतो गोमथ्शब्दः । गोमत् । गोमद् । गोमथी । गोमन्थि । इत्यादि । चकारांतः मूलानि वृश्चतीति क्विप् । स्फादिखे षत्वादि । मूलवृट् । मूलवृड् । मूलवृश्ची । मूलवृंश्चि । इत्यादि । प्राञ्चतीति प्राक् । प्राग् । शीभावे अच इत्यखं । चाविति दीर्घं । प्राची । प्राञ्चि । इत्यादि । एवं प्रत्यच्अमुमुयच्सम्यच्तिर्यच्प्रभृतयः । ददच्शब्दात् स्वादयः ।

स्वादय: । सुप्याष्ट्न:, युष्मदस्मदो:, मावयेरिति च प्रस्तुत्य—

३३६। **त्वाहौ सौ** । ५ । १ । १५८ । युष्मदस्मदोस्तदन्तस्य च गोर्मावयेर्यथासंख्यं त्व अह इत्येतावादेशौ भवतः ।

३३७ । **ङेसुटोऽम्**[1] । ५ ।१। २४ । युष्मदस्मदोस्तदंतस्य च गोर्मावयेर्यथासंख्यं गुसंज्ञानिमित्तभूतस्य ङे इत्येतस्य सुटश्च सुप: अमित्ययमादेशो भवति ।

३३८ । **त्वमादेशे** । ५ । १ । १५३ । युष्मदस्मदो: त्वं भवति आदेशभूते सुपि परत: । इति वकारस्य त्वं । पूर्वोमीति पूर्वत्वं । त्वम् । अहम् ।

३३९ । **युवावौ द्वौ** । ५ ।१। १५९ । युष्मदस्मदोर्द्वित्वे वर्तमानयो: मावये: शब्दरूपस्य यथासंख्यं युव आव इत्येतावादेशौ भवत: सुपि परत: ।

३४०। [2]**आयिपि** । ५ । १ ।१६१। युष्मदस्मदोस्तदन्तस्य च गोराकारादेशो भवति औकारे इपि च सुपि परत: । युवाम् । आवाम् ।

३४१ । **यूयवयौ जसि** । ५ । १ । १५८ । युष्मदस्मदोर्मावये: तदंतस्य च गोर्यथासंख्यं यूय वय इत्येतावादेशौ भवत: जसि सुपि परत: । पूर्ववदमादेशो च कृते एप्यत इति पररूपं । यूयम् । वयम् ।

---

१ अस्य स्थाने ङेसुटोऽम् । ५ । १ । २४ । इति सूत्रं ।

२ । अस्य स्थाने – इपि । ५ । १ । १४६ । इति । आवि । ५ । १४७ । इति सूत्रद्वयं ।

स्मदोः आविभक्तैकवचनांतयोर्यथासंख्यं ते मे इत्येतावादेशौ भवतः । दानं ते दीयते । दानं मे दीयते । शीलं मे स्वं । शीलं ते स्वं ।

३५५ । त्वामेपः[1] । ५ । ३ । २७ । वाक्यस्यावयवयो-स्तद्वाक्यावयवात् पदात् परयोरपादादौ वर्तमानयोः युष्मदस्म-दोर्द्वितीयैकवचनांतयोः त्वा मा इत्येतावादेशौ भवतः । त्वामित्येत-स्य मन्तस्य मा इत्ययमादेशः । धर्मस्त्वा रक्षतु । धर्मो मा रक्षतु । एते वान्नावाद्यादेशाः अनन्वादेशे विभाषिता वेदितव्याः । अन्वादेशे तु नित्यमिति ।

३५६ । [2]बोध्यं प्राक्नेव । ५ । ३ ।३२। बोध्यांतं पदं युष्मदस्मद्भ्यां पूर्वन्नेवाविद्यमानवद् भवति । किमसद्भावे प्रयोजनम् ? वान्नावादेशनिवृत्तिः । देवदत्त युवाभ्यां दीयते शीलं । देवदत्त आवाभ्यां शीलं दीयते । देवदत्त युवां धर्मो रक्षतु । देवदत्त आवां धर्मो रक्षतु । देवदत्त युवयोः शीलं स्वं । देवदत्त आवयोः शीलं स्वम् । देवदत्त युष्मभ्यं शीलं दीयते । देवदत्त अस्मभ्यं शीलं दीयते । देवदत्त युष्मान् रक्षतु धर्मः । देवदत्त अस्मान् रक्षतु धर्मः। देवदत्त युष्माकं शीलं स्वं। देवदत्त अस्माकं शीलं स्वं । एवं इतरत्रापि बोध्यं ।

३५७ । न चवाहाहैवयोगे । ५ । २ । २८ । च वा ह अह एव इत्येतैः शब्दैर्योगे संबंधे युष्मदस्मदोर्वान्नावाद्या-

---

१ । अस्य स्थाने त्वामाविपः । ५ । ३ । १९ । इति सूत्रं ।

२ । अस्य स्थाने "बोध्यमसद्वद् । ५ । ३ । २५ । इति सूत्रं ।

देशाः न भवंति । ज्ञानं युवाभ्यां च दीयते । ज्ञानं आवाभ्यां च दीयते । ज्ञानं युवां च रक्षतु । ज्ञानं आवां च रक्षतु । ज्ञानं युवयोश्च स्वं । ज्ञानमावयोश्च स्वं । ज्ञानं युवाभ्यां वा दीयते । ज्ञानमावाभ्यां वा दीयते । ज्ञानमावाभ्यां ह दीयते । ज्ञानं युवाभ्यां अह दीयते । ज्ञानमावाभ्यां अह दीयते । ज्ञानं युवाभ्यामेव दीयते । ज्ञानमावाभ्यामेव दीयते । एवमन्यत्राप्युन्नेयं ।

३५८ । **दृश्यर्थैश्चिंतायां** । ५ । ३ । २१ । दृश्यर्थैर्धातुभिः चिंताविषयैर्योगे युष्मदस्मदोर्वशादयो न भवन्ति । स च योगः परम्परया साक्षाच्चाभ्यूह्यः । ज्ञानं युवाभ्यां दीयमानं संदृश्यागतो जनः । ज्ञानमावाभ्यां दीयमानं संदृश्यागतो जनः । जनो युवां समीक्ष्य गतः । जन आवां समीक्ष्य गतः । जनो युवयोः कार्यमालोचयति । जन आवयोः कार्यमालोचयति । एवमपरेऽपि विज्ञेयाः । चिंतायां इति किं ? जनो वः पश्यति । चक्षुषा इत्यर्थः ।

## अथासिङ्गसंख्यानि शब्दरूपाणि उच्यंते ।

३५९ । [1]**ततसत्रासकृत्वसुसुवद्धाऽऽम्-क्त्वांतुमसुम्भिडाभत्यन्यकृस्वरादयो झिः** । १ । १ । ८८ । तत् तस् सात् त्रा शस् कृत्वस् सुच् वद् धा आम् त्का अम् तुम् इत्येतदन्तास्ताः सुम्भिस्मातिरूपाः तिसंज्ञा अन्ययभूताः स्वरादयश्च शब्दा झिसंज्ञा भवंति । तादिति प्रत्या-

---

१ । अस्य स्थाने असंख्य झिः । १ । इति सूत्रं ।

अथ स्त्रीप्रत्ययाः ।

ङ्याम्मृदः, स्त्रियामिति च वर्तमाने—

२६० । [1]अजाद्यतां टाप् । ३ । १ । ४। अज इत्येवमादीनां अकारान्तानां च मृदां वाच्यायां स्त्रियां द्योत्यायां टाबित्ययं प्रत्ययो भवति ॥ बाधकबाधनार्थं अजादीनामुपादानं । अनकारान्तार्थं च । अजा । एडका । अश्वा । चटिका । मूषिका । कोकिला । अत्र जातिलक्षणस्य ङ्यो बाधा । बाला । होढा । पाका । वत्सा । मन्दा । वत्सा । अत्र वयोलक्षणस्य ङ्यो बाधा । पूर्वापहाणा । अपरापहाणा । परमहाणा । अत्र टिल्लक्षणस्य निपातनाण्णत्वमाद्योः । त्रिफला । अत्र रलक्षणस्य । क्रुञ्चा । उष्णिहा । देवविशा । अत्र हलन्तत्वादत इति अप्राप्तः । अतः खल्वपि । खट्वा । देवदत्ता । या । सा । कारिषगन्ध्या । क्रोड्या । टाबन्तानां दुर्गाशब्दवद्रूपसिद्धिः ।

२६१ । [2]उक्युगिदृन्नन्नञ्च्चोः । ३ । १ । ५ । उगिदन्तात् ऋकारान्तात् अञ्चत्यन्ताच्च मृदः स्त्रियां वर्तमानात् ङीप्रत्ययो भवति । उगितः—गोमतु । गोमती । श्रेयसु । श्रेयसी । विद्वसु । विदुषी । वसो वस्योस् । भवतु । भवती । तत्रभवती । कृतवतु । कृतवती । अतिपुंसु । अतिपुंसी । ऋदितः-महत् । महती । दधत् । दधती । सुदत् । सुदती । इत्यादि । ऋतः-कर्त्री । हर्त्री । धात्री । भर्त्री । मात्री । पवित्री । सवित्री । क्रोष्ट्री ।

---

१ । अस्य स्थाने अजाद्यतष्टाप् । ३ । १ । ४ । इति सूत्रं ।

२ । अस्य स्थाने—उगिदृन्नान्ङी । ३ । १ । ६ । इति सूत्रं ।

पश्यति । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति । पुनस्तद् द्विविधमपि सुखमसुखं चेति । अजां नयति ग्रामं । गां दोग्धि पयः । पुनः सप्तधा च । तदुक्तं—

माप्यं विषयभूतं च निर्वर्त्यं विक्रियात्मकं ।

कर्तुश्च क्रियया चाप्यमीप्सितानीप्सितेतरत् ॥१॥ इति ।

क्रियते कटः । कृतः कटः । शक्यः कटः । प्रासादको ग्राम इत्यत्र मिक्कृतद्धितसैरविहिते ऽभिधेयाभावान्मिक्कैकार्थत्वाच्च न भवति । प्रधानं चाभिहितमिति ।

३८१ । [1]हान्तरान्तरेणातिधिङ्निकषासमयाभिश्रोपाधौ । १ । ४ । २ । हा अन्तरा अन्तरेण अति धिक् निकषा समया इत्येतैर्भिसंज्ञकैर्योगे उपाधौ परार्थे ङ्याम्मृदः इब् विभक्ती भवति । परार्थमुपकारकं विशेषणं अप्रधानं । प्रधानं विशेष्यमुपकार्यं । यदर्थमन्यदुपाधीयते स उपाधिः । टशावितौ । हा देवदत्तं वर्तयते व्याधिः । अंतरा निषधं नीलं च विदेहाः । अन्तरेण पुरुषकारं न किंचित् । अतिवृद्धं कुरून्महद्बलं । धिग् देवदत्तमयशः प्रवृद्धं । निकषा पर्वतं नदी । समया ग्रामं ग्रामाः । हा तात धिक् मातरित्यादौ संबोधनतया विवक्षा न हादियोगे वाया इति नेब् भवति । चकारोऽनुक्तसमुच्चयार्थस्तेन बुभुक्षितं न प्रतिभाति किंचित् । वृषलं च भद्रे प्रतिभाति यस्यामित्यादि सिद्धं ।

---

१ । अस्य स्थाने महावृत्तौ वार्तिकमुपलभ्यते । अंतरांतरेण योगे । १ । ४ । ३ । इति सूत्रं च ।

धर्मं मोक्षाय मेधावी धनं दानाय भक्तये ॥ १ ॥

३६३ । [1]शक्तार्थनमःस्वस्तिस्वाहावषट्स्वधाहितैः । १ । ४ । २९ । शक्तार्थैः शब्दैः नमस्स्वस्तिस्वाहावषट्स्वधाहित इत्येतैश्च योगे उपाधौ अप् विभक्ती भवति । शक्तो जिनदत्तो देवदत्ताय । मल्लो मल्लाय प्रभवति । नमोस्तु परमेष्ठिने । स्वस्ति मातृपितृभ्यां । इन्द्रेन्द्राणीभ्यां स्वाहा । वषट् अग्निभ्यः । स्वधा उपाध्यायेभ्यः । हितं मातृपितृभ्यां । ङ्यस्य वा कर्तरीत्यतो वेति वर्तमाने -

३६४ । [2]मद्रक्षेमायुःशंहितार्थार्थैराशिष्यप् । १ । ४ । ८९ । मद्रार्थैः क्षेमार्थैरायुरार्थैः शमर्थैर्हितार्थैश्च शब्दैर्योगे उपाधौ वर्तमानात् ङ्याम्मृदोर्वाऽब्विभक्ती भवति आशीर्विषये पक्षे ता भवति । मद्रमस्तु जिनशासनाय । मद्रमस्तु जिनशासनस्य । भद्रमस्तु जैनाय । भद्रमस्तु जैनस्य । कल्याणमस्तु जैनस्य । क्षेममस्तु संघाय । क्षेममस्तु संघस्य । कुशलमस्तु संघाय । निरामयमस्तु संघाय । संघस्य वा । दीर्घमायुरस्तु भव्याय । बहुजीवितमस्तु भव्याय । भव्यस्य वा । शमस्तु प्रजाभ्यः । शुभमस्तु प्रजाभ्यः । शर्म अस्तु प्रजाभ्यः । प्रजानां वा । हितं

---

१ । अस्य स्थाने—नमःस्वस्तिस्वाहास्वधालंवषड्योगे । १ । ४ । २६ । इति ।

२ । अस्य स्थाने—भद्रायुष्यक्षेमार्थैराशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितार्थैः । १ । ४ । ७७ । इति सूत्रं ॥

वर्तमानं त्रिसंख्यकं सुबंतं समर्थं सुपेतरेणापि सुबंतेन समर्थेन सह समस्यते । विवक्षायां ह इति विशेषसंज्ञा च भवति । तत्र वेति विकल्पाधिकाराभावादसति स्वपदवाक्ये तदर्थघातनोपायेनास्वपदविग्रहेणार्थः सदर्श्यते । स्त्रीषु वर्तते । यवनानां व्यृद्धिः । मद्राणां ऋद्धिः । मक्षिकाणामभावः । शीतस्यातीतिः । कंबलस्यायमकालः । पूज्यपादस्य शब्दख्यातिः । रथानां पश्चात् । रूपस्य योग्यं । व्रतस्य सदृशं । अर्थमर्थं प्रति । ज्येष्ठानां अनतिक्रमः । चक्रिणा युगपत् । वृत्तस्य संपत् । तृणेन सह । कुंभस्य समीपं । प्राभृतमतं कृत्वेत्येवं हसंज्ञायां सत्यां—कुद्रसा इति भृतसंज्ञाप्रतिलंभात् सुपो मृद्भोरिति सुप उप् ।

४१५ । घोक्तं पूर्वं[१] । १ । ३ । १०६ । साधिकारे वया निर्दिष्टं पूर्वं प्रयोक्तव्यं । इति अधिप्रभृतीनां पूर्वनिपातः । हश्चेति नप् । प्रो नपीति प्रादेशः । क्याम्मृद इत्यधिकृत्य पुनः स्वादिविधिः ।

४१६ । हात् । १ । ४ । १६९ । हसविधेरुत्तरस्य सुप उप् भवति । अधिस्त्रि ।

४१७ । नातोऽम्त्वकायाः । १ । ४ । १७० । हादकारांतात् परस्य सुप उप् न भवति अमादेशस्तु भवति अकायाः । दुर्यवनं । सुमद्रं । निर्मक्षिकं । निःशीतं । अतिकंबलं । इति पूज्यपादं । अनुरथं । अनुरूपं । सहस्य सः । खाविति

१ । अस्य स्थाने वोक्तं न्यक् । १ । ३ । १३ । पूर्वं । १ । ३ । १७ । इति सूत्रद्वयं ।

शंकुलया कृतः खंडवानिति विगृह्य–

४३२ । [1]भा नत्कृतयार्थेनोनैः । १ । ३ । २८ । भांतं भांतार्थकृतार्थया गुणोक्त्या अर्थशब्देन ऊनवाचिभिश्च सह षसो वा भवति । गुणोक्तेर्विन्मतोरुप् । शंकुलाखंडः । वृत्तौ कृतशब्दार्थोऽतर्भूत इति न कृतशब्दः प्रयुज्यते । एवं गिरिकाणः । घारशुक्लः । पदपटुः । धान्यार्थः । माषोनः । माषविकलः ॥ आत्मन् कृत । दात्र लून इति स्थिते- आत्मन्दात्रश-ब्दाभ्यां टा । कृतलूनशब्दाभ्यां सुः । आत्मना कृतं । दात्रेण लूनं । इति विगृह्य–

४३३ । साधनं कृता बहुलं । १ । ३ । ३० । साधनं कारकं क्रियानिर्वर्त्तकं तद्वाचि भांतं पूर्वपदं कृतेन सह षसो भवति बहुलं । शेषं पूर्ववत् । नो मृबंते खमिति नखं । आत्मकृतं । दात्रलूनं । एवं परकृतं । परशुच्छिन्नं ॥ रथाय दारुः । कुंडलाय हिरण्यं । इति विगृह्य—

४३४ । [2]अप्रकृतितदर्थार्थादिभिः । १ । ३ । ३१ । प्रकृतिः परिणामि द्रव्यं । तद्वाचिना सुबंतेनोत्तरपदेन अर्थाद् विकृतिवाचिपूर्वपदं अबंतं तदर्थार्थशब्देन तदादिभिश्चान्यैः सह षसो भवति । अन्यत् पूर्ववत् । रथदारुः । कुंडलहिरण्यं । एवं पित्रे इदं पित्रर्थं । देवाय बलिः देवबलिः । प्रजाभ्यो हितं प्रजाहितं । इत्यादि ॥ वृकात् भीः । चौरेभ्यो भयमिति विगृह्य—

---

१ । अस्य स्थाने-भा गुणोक्त्यार्थेनोनैः ।१।३। २७। इति सूत्रं ।
२ । अप् तदर्थार्थबलिहितसुखरक्षितैः । १ । ३। ३१। इति सूत्रं ।

विना सुबंतेन बसो भवति। सुजर्थो वारः काल इत्युच्यते। स चाभ्यावर्तमानया क्रियया सह संबध्यमानो द्विः संख्यायते। अत्र भवतिक्रियाभ्यावृत्तिः। दशभावो हि द्विरावर्तते। द्व्यर्थस्य पुनः पुनः पाठ आवृत्तिः। पूर्ववदन्यत्। स्यिबादबहोरिति डः। डिति टेः खं च। बसस्याश्रयलिंगत्वात् त्रिष्वपि लिंगेषु नेयाः। द्विदशाः पुमांसः। द्विदशाः स्त्रियः। द्विदशानि वस्त्राणि। विंशतिरित्यर्थः। एवं त्रीन् वारान् दश त्रिदशाः। चतुरो वारान् दश चतुर्दशाः। पंचदशाः। इत्यादि॥ उभयपदार्थप्रधानो यथा—द्विशब्दादौ। त्रिशब्दाज्जस्। द्वौ वा त्रयो वा इति विगृह्य सुज्वार्थे इत्यनेन वार्थे संशये विकल्पे वा बसो भवति। पूर्ववच्छेषं। द्वित्राः स्त्रियः। द्वित्राणि वस्त्राणि। अत्र संशय्यमाना विकल्प्यमाना वा पूर्वोत्तरपदार्थो इत्यर्थः। अन्यपदार्थप्रधानो यथा-सु धर्म इति उभयत्र सुः। शोभनो धर्मो यस्येति विगृह्य—

४५१। [1]एकार्थे। १। ३। ९०। एकः समानोऽर्थो द्रव्यमधिकरणमस्य तदेकार्थं समानाधिकरणमनेकं सुबन्तं भवति अन्यार्थेऽभिधेये। ततः सुबुप्। गुणस्तिस्त्रियेमे इति सुश-

---

१। अस्य स्थाने नास्ति किमपि सूत्रं। परं ईविशेषणं बहुव्रीहौ। १। ३। १०१। अनेन बहुव्रीहौ ईबंतस्य पूर्वनिपातो व्याप्ते व्यधिकरणेऽपि बहुव्रीहिर्भवतीति महावृत्तौ। अत्र तु अनेन समानाधिकरणः। अत्रान्यार्थेऽनेकं चमित्यनेन व्यधिकरणस्तेन कंठेकाल इत्यादयः सिध्यंति। एवं च ईबंतस्य पूर्वनिपातविधायकं शास्त्रं ग्रन्थाख्यातं।

जनकमलाकरावबोधनकरनयकरस्याह्लाददिनकरप्रभाप्रहृतो मिथ्या-वादांधकारो येन स भव्यजनकमलाकरावबोधनकरनयकरस्याह्लाद-दिनकरप्रभाप्रहृतमिथ्यावादांधकारः । इति बसः । कोऽसौ श्रीशांतिनाथः ।

## अथ द्वंद्वापवाद एकशेषः ।

वक्रश्च कुटिलश्चेति विग्रहे द्वंद्वसे प्राप्ते तदपवादः--

४९७। [1]समानामेकः । १।३।९७ । समानां तुल्यार्थानां शब्दानां चार्थे वर्तमानानामेक एव प्रयोक्तव्यः । सुबुपमकृत्वैव द्वंद्वापवादोयमेकशेषः क्रियते । इति नात्रावयवसुपो नाशः संभवति । वक्रौ कुटिलौ वा प्रयुज्यमानः शब्दोऽप्रयुज्यमानानां शब्दानां अर्थं ब्रूते । इतरथा चार्थे द्वन्द्वयोगादिति द्विवचनबहुवचनेऽपि भवतः । वक्रौ कुटिलौ वा । वाक्यवद् वक्रकुटिलौ इति न भवति ॥ अक्षश्च शकटाक्षः । अक्षश्च देवनाक्षः । अक्षश्च बिभीतकाक्षः । इति विगृह्य—

४९८ । सुप्यसंख्येयः । १ । ३ । ९८ । सुपि सर्वत्र ये समा एकरूपाः शब्दास्तेषां द्वंद्वे प्राप्ते एक एव प्रयोक्तव्यः संख्येयवाचि शब्दरूपं वर्जयित्वा । अक्षाः । एवं पादश्च पादश्च पादश्च पादाः । विंशतिश्च विंशतिश्च विंशतिश्च विंशतयः । असंख्येय इति किं ? एकश्च एकश्च । द्वौ च द्वौ च ।

---

१ । स्वाभाविकत्वादभिधानस्यैकशेषानारंभः । १ । १ । १०० । इति योगस्तेन एकशेषविधिरेव न विहितः ।

मांतिकादागतः ॥ ओजस् कृत । अंभस् कृत । तपस् कृत । अजस् कृत । इति स्थिते ओजसादिभ्यः कर्तरि करणे वा भा। कृतास्तुः । साधनं कृतेति षसः । सुप उपि प्राप्ते–

**४७२ । [1]द ओजस्सहोंभस्तपोऽञ्जसः । ४ । ३ । १५१ ।** ओजसादिभ्यः परस्य भेकवचनस्य धावनुग्भवति । ओजसाकृतं । सहसाकृतं । अंभसाकृतं । तपसाकृतं । अंजसाकृतं । तमोंजस इत्येके । तेषां तमसाकृतं ॥ पर पद । आत्मन् पद इति स्थिते–परात्मन्शब्दाभ्यां "तादर्थ्ये" इत्यप् । परस्मै पदं । आत्मने पदं । इति विगृह्य– अप्प्रकृतितदर्थार्थादिभिरिति तादर्थ्ये षसः । सुप उपि प्राप्ते खाविति वर्तमाने—

**४७३ । केः परा[2]त्मनः । ४ । ३ । १५६ ।** परात्मन् शब्दाभ्यां परस्य केरेकवचनस्य धावनुग्भवति खौ विषये । परस्मैपदं । आत्मनेपदं । एवं परस्मैभाषः । आत्मनेभाषः । खाविति किं? परहितं ॥ अरण्य तिलक । त्वच् सार । इति स्थिते- अरण्यादेरीप् । तिलकादेर्वाः । अरण्ये तिलकाः । त्वचि सार इति विगृह्य—

**४७४ । खौ । १ । ३ । ३७ ।** खुविषये ईबंतं सुबंतेन षसो भवति । ततः सुप उपि प्राप्ते—

**४७५ । ईपोऽकूलः । ४ । ३ । १५७ ।** अकारांतात्

१ । अस्य स्थाने - भाया ओजस्सहोंभस्तमोंजसः । ४ । ३ । १२२ । इति सूत्रं । २ । अस्य स्थाने - केः खौ पराच्च । ४।३।१२६ । इति सूत्रं ।

पोतानेष्टोद्गातारः ।

४८९ । [1]द्वंद्वे घिस्येकं । १ । ३ । ११२ । द्वंद्वे सं विसंज्ञं सुसंज्ञं चैकं पूर्वं प्रयोक्तव्यं । इत्यत्रैकग्रहणात् बहूनामपि द्वंद्वो भवति। होता च पोता च नेष्टा च उद्गाता च होतृपोतृनेष्टोद्गातारः । होता च पोता च नेष्टोद्गातारौ च होतृपोतानेष्टोद्गातारः । सुरंत्यामिति विवक्षायां आकारः ।

४९० । अग्नेंद्रादिषु देवतानां । ४।३।१८० । अग्नेन्द्र इत्येवमादिषु देवतावाचिषु द्वंद्वेषु ङान् भवति । अग्निश्च इंद्रश्च अग्नेंद्रौ । अग्नाविष्णू । इन्द्रासोमौ। इन्द्रावरुणौ। सूर्याचंद्रमसौ।। एतेष्विति किं ? सूर्यचन्द्रौ ।

४९१ । षोमवरुणेऽग्नेरीः । ४ । ३ । १८१ । अग्नि-शब्दस्य सोमवरुणयोर्द्व्योर्देवताद्वंद्वे ईकारो भवति । अग्निश्च सोमश्च अग्नीषोमौ । अग्निश्च वरुणश्च अग्नीवरुणौ । षोम इत्यत एव निपातनाद् अग्नेरीत्वे सोमस्य षत्वं ।

४९२ । नैप्यविष्ण्वद्रे । ४ । ३ । १८२ । अग्नेरैपि विषये विष्णिवद्रवर्जिते यौ ङानीकारश्च न भवति । अग्निश्च मरुच्च देवते अस्य आग्निमारुतं कर्म। अग्निश्च वरुणश्च देवते-ऽस्याः आग्निवारुणी अनड्वाही । ऐपीति किं ? अग्नीमारुतौ । अग्नीवरुणौ । अविष्ण्वद्रे इति किं? आग्नावैष्णवं। आग्नेन्द्रं ।

इति श्रीजैनेंद्रप्रक्रियावतारे तृतीयं समृत्तं समाप्तं ॥ ३ ॥

---

१ । अस्य स्थाने - द्वंद्वे सु । १ । ३ । ९८ । इति ।

